# शांति मंत्रम्

आपो॒ हिष्ठा म॑यो॒भुव॑: । ता न॑ ऊ॒र्जे द॑धातन । म॒हेरणा॑य॒ चक्ष॑से । यो व॑:
शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयते॒ ह न॒: । उ॒ष॒तीरि॑व मा॒तर॑: । तस्मा॒
अर॑ंगमामवो॒ यस्य॒ क्षया॑य॒ जिं॑न्वथ । आपो॑ ज॒नयं॑था च नः ।

पृ॒थि॒वी शा॒ंता साग्निना॑ शा॒ंता सामे॑ शा॒ंता शुचग॑ं शमयतु । अ॒ंतरि॑क्षग्ं
शा॒ंतं तद्वा॒युना॑ शा॒ंतं तन्मे॑ शा॒ंतग्ं शुचग॑ं शमयतु । द्यौश्शा॒ंता॒ सादि॒त्येनं॑
शा॒ंता सा मे॑ शा॒ंता शुचग॑ं शमयतु ।

पृ॒थि॒वी शांति॑र॒ंतरि॑क्ष॒ग्ं शांति॒र्-द्यौ-श्शांति॒र्-दिश॒-श्शांति॑-रवांतरदि॒शा-
श्शांति॑ र॒ग्नि-श्शांति॑र्-वा॒यु-श्शांति॑-रादि॒त्य-श्शांति॑-श्चं॒द्रमा॒-श्शांति॒र्-
नक्ष॑त्राणि॒-श्शांति रा॒प॒श्शांति॒-रोष॑धय॒-श्शांति॒र्-वन॒स्पत॑य॒-श्शांति॒र्-गौं-
श्शांति॑-र॒जा-शांति-रश्व॒-श्शांति॒: पुरु॑ष॒-श्शांति॒-ब्रह्म॒-शांति॑र्-ब्राह्म॒ण-
श्शांति-शांति॑-रेव शांति-शांति॑-र्मे अस्तु॒ शांति॑: ।

तया॒हग्ं शान्॒त्या॒ स॑र्वशा॒ंत्या॒ मह्यं॑ द्वि॒पदे॒ चतु॑ष्पदे च॒ शांति॑ करोमि
शांति॑र्मे अस्तु॒ शांति॑: ॥

एह॒ श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा प्र॑ति॒ष्ठा श्र॒द्धा स॒त्यं धर्म॑श्चै॒ताति॒
मोत्ति॑ष्ठं॒त-मनूत्ति॑ष्ठंतु मा मा॒ग् श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा प्र॑ति॒ष्ठा श्र॒द्धा
स॒त्यं धर्म॑श्चै॒तानि॑ मा॒ मा हा॑सिषु: ।

उदायु॑षा स्वा॒युषोदो॑षदीना॒ग्ं रसे॒नोत्प॒र्जन्यं॑स्य॒ शुष्मे॒णोदस्थाम॒मृता॒ग्ं अनुं॑
। तच्चक्षु॑र्-दे॒वहि॑तं पु॒रस्ता॑च्चु॒क्रमु॒च्चरं॑त् ।

पश्ये॑म श॒रद॑श्श॒तं जीवे॑म श॒रद॑श्श॒तं नंदा॑म श॒रद॑श्श॒तं मोदा॑म श॒रद॑श्श॒तं
भवा॑म श॒रद॑श्श॒तग्ं शृ॒णवा॑म श॒रद॑श्श॒तं पब्र॑वाम श॒रद॑श्श॒तमजी॑तास्याम
श॒रद॑श्श॒तं जोक्च॒ सूर्यं॑ दृ॒षे ।

eAstroHelp
Your Astrology Helpline

य उदंगान्महतोऽर्णवाँद्-विभ्राजंमानस्सरिरस्य मध्यात्समां वृषभो लोंहिताक्षसूर्यो विपश्चिन्मनंसा पुनातु ॥

ब्रह्मंणश्चोतन्यसि ब्रह्मंण आणीस्थो ब्राह्मंण आवपंनमसि धारितेयं पृंथिवी ब्रह्मंणा मही दांरितमेंनेन महदन्तरिंक्षं दिवं दाधार पृथिवीगं सदेवां यदहं वेद तदहं धांरयाणि मामद्वेदोऽधि विस्रंसत् ।

मेधामनीषे माविशतागं समीचीं भूतस्य भव्यस्यावंरुध्यै सर्वमायुंरयाणि सर्वमायुंरयाणि ।

आभिर्-गीर्भि र्यदतोंन ऊनमाप्यांयय हरिवो वर्धमानः । यदा स्तोतृभ्यो महिं गोत्रा रुजासिं भूयिष्ठभाजो अधं ते स्याम । ब्रह्म प्रावांदिष्म तन्नो मा हांसीत् ॥

ॐ शांतिः शांतिः शांतिः ॥

ॐ सं त्वां सिंचामि यजुंषा प्रजामायुर्धनं च ॥

ॐ शांतिः शांतिः शांतिः ॥

ॐ शं नों मित्रः शं वरुंणः । शं नों भवत्वर्यमा । शं न इंद्रो बृहस्पतिः । शं नो विष्णुंरुरुक्रमः । नमो ब्रह्मंणे । नमंस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मांसि । त्वामेव प्रत्यक्षं ब्रह्मं वदिष्यामि । ऋतं वंदिष्यामि । सत्यं वंदिष्यामि । तन्मामंवतु । तद्वक्तारंमवतु । अवंतु माम् । अवंतु वक्तारम् ॥

ॐ शांतिः शांतिः शांतिः ॥

ॐ तच्छं योरावृंणीमहे । गातुं यज्ञायं । गातुं यज्ञपंतये । दैवीं स्वस्तिरंस्तु नः । स्वस्तिर्-मानुंषेभ्यः । ऊर्ध्वं जिंगातु भेषजं । शं नों अस्तु द्विपदें । शं चतुष्पदे ।

eAstroHelp
Your Astrology Helpline

ॐ शांति॒: शांति॒: शांति॑: ॥

ॐ स॒ह ना॑ ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यँ॑ करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚ ॥

ॐ शांति॒: शांति॒: शांति॑: ॥

ॐ स॒ह ना॑ ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यँ॑ करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚ ॥

ॐ शांति॒: शांति॒: शांति॑: ॥

ॐ स॒ह ना॑ ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यँ॑ करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚ ॥

ॐ शांति॒: शांति॒: शांति॑: ॥

eAstroHelp
Your Astrology Helpline